**कुप** आच्छादने इदित् वा चुरा० उभ० पक्षे भ्वादि० पर० सक० सेट्। कुम्पयति ते कुम्पति अचुकुम्पत् त अकुम्पीत् । कुम्पयाम् बभूव आस चकार—चक्रे । चुकुम्प । प्रनि कुम्पयात्

**कुप** द्युतौ चुरा० उभ० अक० सेट् । कोपयति ते अचूकुपत् त । कोपयाम् बभूव आस चकार चक्रे । कुपितः कोपः कोपनम् कुपित्वा प्रकुप्य । “प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः कुपितत्वचः” भाग० ३,१६,

**कुप** रोषे दिवा० सक० प० सेट् । कुप्यति इरित् अकुपत् अकोपीत् चुकोप । “यस्मिन् यस्मिन् ऋतौ ये ये दोषाः कुप्यन्ति देहिनाम्” सुश्रु० । “तस्य तद्वचनं श्रुत्वा रूक्षं रूक्षाक्षरं बहु । चुकोप बलिनां श्रेष्ठः” भा० स० ४१ अ० । “कुपितकपिकपोलक्रोड़ताम्रस्तमांसि । उद्भटः “दुह्य कुप्यसि याचके” भा० आ० ७८ अ०” अस्य आर्षे पदव्यत्ययोऽपि दृश्यते । “नन्दते कुप्यते चापि तथा हुङ्कारयत्यपि” भा० आनु० १४ अ० । “न च कुप्ये महासर्प ! न चात्मानं विगर्हये” भा० व० १७६ अ० । उपसर्गपूर्व्वकस्य तत्तदुपसर्गद्योत्यार्थपरत्वम् यथा प्रकोपः संकोपः अतिकोपः इत्यादि । “क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः” पा० कर्म्मणः सम्प्रदानता ।

**कुपथ** पु० कुत्सितः पन्थाः कुगतिसमा० अच् समा० । १कुत्सिते पथि शब्दरत्ना० । “स्वधर्म्मपथमकुतोभयम् विहाय कुपथपाषण्डमसमञ्जसं संप्रवर्त्तयिष्यति” भाग० ५,६, १० श्लो । स सेव्यत्वेनास्त्यस्य अर्श० अच् । २असुरभेदे “प्रमदो मयश्च कुपथो हयग्रीवश्च वीर्य्यवान्” हरि० ३ अ० “तथा निकुम्भः कुपथश्च दानवः” हरि० २४१ अ० । स एव सुपार्श्वनृपरूपेण द्वापरे आविर्भूतः “कुपथस्तु महावीर्य्यः श्रीमान् राजन् ! महासुरः । सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः” भा० आ० ६७ अ० ।

**कुपन** पु० कुप—क्यु । हिरण्याक्षसैन्यस्थे असुरभेदे “शरभः शलभश्चैव कुपनः कोपनः क्रथः” हरिवं० ४२ अ० ।

**कुपय** त्रि० गुप—क्यप् पृषो० । गोपनीये । “आ स्वाद्यं कुपयं वर्द्धनं पितुः” ऋ० १,१४०,३, “कुपयं गोपनीयम्” भा०

**कुपाणि** त्रि० कुत्सितः पाणिरस्य । वक्रहस्ते बाङ्कुण्ठे (कोपा) । जटा०

**कुपिञ्जल** पुंस्त्री कुत्सितः पिञ्जल इव पुच्छोऽस्य । पक्षिभेदे स्त्रियां ङीष् ततः शिवा० अण् । कौपिञ्जल तदपत्ये पुंस्त्री० ।

**कुपिनिन्** पु० कुपिनी मत्स्यधानी अस्त्यस्य ब्रीह्या० इनि । मत्स्यधारके कैवर्त्ते त्रिका० ।

**कुपिनी** स्त्री गुप्यते मत्स्योऽत्र गुप—बा० इनि किच्च ङीप् पृषो० । (माछेरखालुइ) मत्स्याधारे पात्रभेदे शब्दरत्ना० ।

**कुपिन्द** पुंस्त्री कुप—किन्दच् । तन्तुवाये उणादिको० ।

**कुपीलु** पु० कुत्सितः पीलुः कुगतिस० । (माकड़ातेन्दु) काकेन्दुवृक्षे भावप्र० । यस्य फलं (कुचिला) इतिख्यातम् । तत्पर्यायगुणादि भावप्र० उक्तं यथा

“तिन्दुको यस्तु कथितो जलदो दीर्घपत्रकः । कुपीलुः कुलकः कालस्तिन्दुकः कालपीलुकः । काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः । कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु । पादव्यथाहरं ग्राहि कफपित्तास्रनाशनम्” ।

**कुपुत्र** पु० कुत्सितः पुत्रः कुगतिस० । कुत्सिते पुत्रे १ “तादृशं फलमाप्नोति कुपुत्रैः सन्तरँस्तमः” मनुः । ब० व्री० । २कुत्सितपुत्रयुक्ते त्रि० । भावे कर्म्मणि च ततो मनोज्ञा० वुञ् । कौपुत्रिका तद्भावे स्त्री । कोः पृथिव्याः पुत्रः । ३मङ्गलग्रहे ४नरकासुरे च । [ दिनिन्दिते अमरः

**कुपूय** त्रि० कुत्सितं पूयते पूय—विसरणे अच् । जात्याचारा-

**कुप्य** न० गुप—क्यप् नि० । स्वर्णरूप्याभ्यामन्यस्मिन् १तेजसादौ धातौ, अमरः (दस्ता) इति ख्याते २धातौ च

**कुप्यशाला** स्त्री कुप्यस्य तत्पात्रादिनिर्म्माणस्य शाला । (काँसारिर दोकान) कांस्यादिपात्रनिर्म्माणगृहे हेमच० ।

**कुप्रिय** त्रि० कु+प्री—क । जघन्ये हला० ।

**कुप्लव** पु० कुगतिस० । तृणादिनिर्म्मिते उडुपे शब्दचि० । “यादृशं फलमाप्नोति कुप्लवैः सन्तरन् जलम्” मनुः

**कुब** स्तृतौ (आच्छादने) इदित् वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । कुम्बयति ते कुम्बति अचुकुम्बत् त अकुम्बीत् । कुम्बयाम्—बभूव आस चकार चक्रे चुकुम्ब । कुम्बा

**कुबल** त्रि० कुत्सितं बलमस्य । निन्दितबलयुक्ते ।

**कुबलाश्व** त्रि० कुबलोऽश्वोऽस्य । १दुर्बलाश्वयुक्ते सूर्य्यवंश्ये २नृपभेदे तस्य धुन्धुमारसंज्ञाप्राप्तिः भा० व० २०१ अ० उक्ता यथा “मार्कण्डेय उवाच । इक्ष्वाकौ संस्थिते राजन् ! शशादः पृथिवीमिमाम् । प्राप्तः परमधर्म्मात्मा सोऽयोध्यायां नृपोऽभवत् । शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् । अनेनाश्चापि काकुत्स्थः पृथुश्चानेनसः सुतः । विश्वगश्वः पृथोः पुत्रस्तस्मादद्रिश्च जज्ञिवान् । अद्रेश्च युवनाश्वस्तु श्रावस्तस्यात्मजोऽभवत् । तस्य श्रावस्तकोज्ञेयः श्रावस्ती येन निर्म्मिता । श्रावस्तस्य तु दायादो वृहदश्वो महाबलः । वृहदश्वस्य दायादः कुबलाश्व इति